श्री धूमावती कवचं

श्री धूमावती कवचं

श्रीपार्वत्युवाच |
धूमावत्यर्चनं शंभो श्रुतं विस्तरतो मया |
कवचं श्रोतुमिच्छामि तस्या देव वदस्व मे || 1 ||

श्रीभैरव उवाच |
शृणु देवि परं गुह्यं न प्रकाश्यं कलौ युगे |
कवचं श्रीधूमावत्याः शत्रुनिग्रहकारकं || 2 ||

ब्रह्माद्या देवि सततं यद्भशादरिघातिनः |
योगिनो भवच्छत्रुघ्ना यस्या ध्यानप्रभावतः || 3 ||

ॐ अस्य श्रीधूमावतीकवचस्य पिप्पलाद ऋषिः अनुष्टुप् छंदः श्रीधूमावती देवता धूं बीजं स्वाहा शक्तिः धूमावती कीलकं शत्रुहनने पाठे विनियोगः |

कवचं |
ॐ धूं बीजं मे शिरः पातु धूं ललाटं सदाऽवतु |
धूमा नेत्रयुगं पातु वती कर्णौ सदाऽवतु || 4 ||

दीर्घा तूदरमध्ये तु नाभिं मे मलिनांबरा |
शूर्पहस्ता पातु गुह्यं रूक्षा रक्षतु जानुनी || 5 ||

मुखं मे पातु भीमाख्या स्वाहा रक्षतु नासिकां |
सर्वविद्याऽवतु कंठं विवर्णा बाहुयुग्मकं || 6 ||

चंचला हृदयं पातु धृष्टा पार्श्वे सदाऽवतु |
धूमहस्ता सदा पातु पादौ पातु भयावहा || 7 ||

प्रवृद्धरोमा तु भृशं कुटिला कुटिलेक्षणा |
क्षृत्पिपासार्दिता देवी भयदा कलहप्रिया || 8 ||

सर्वांगं पातु मे देवी सर्वशत्रुविनाशिनी |
इति ते कथितं पुण्यं कवचं भुवि दुर्लभं || 9 ||

न प्रकाश्यं न प्रकाश्यं न प्रकाश्यं कलौ युगे |
पठनीयं महादेवि त्रिसंध्यं ध्यानतत्परैः |
दुष्टाभिचारो देवेशि तद्गात्रं नैव संस्पृशेत् || 10 ||

इति भैरवीभैरवसंवादे धूमावती कवचं संपूर्णं |